# 2018

## SANSKRIT – HONOURS

### Paper : CC-2

### (Critical Survey of Sanskrit Literature)

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I**

1. अधोलिखितेषु यथेच्छं **प्रश्नद्वयस्य** उत्तरं संस्कृतभाषया देवनागर्या लिप्या च लेखनीयम्। 10×2

(a) दार्शनिकसूक्तम् इति पदेन किं सूच्यते? ऋक्संहितायाः दार्शनिकसूक्तानि बहुलतया कस्मिन् मण्डले समुपलभ्यन्ते? ऋग्वेदीयदार्शनिकसूक्तानां मध्ये चतुर्णां नामानि उल्लिख्य तेषु कस्यचिदेकस्य सविस्तरं परिचयं प्रददातु। 3+2+5

(b) ऋग्वेदस्य आविर्भावकालविषये भारतीयानां वैदेशिकानां ये मतवादाः सन्ति तेषु स्वाभिमतं किमपि द्वितयम् अवलम्ब्य विचारः क्रियताम्। 5+5

(c) यजुष्-शब्दस्य अर्थमुल्लिख्य यजुर्वेदस्य नामान्तरं लिख्यताम्। अस्मिन् वेदे मुख्यतया किमालोच्यते? यजुर्वैदिकसमाजे आर्याणां धर्माचरणस्य विशेषता समासेन पर्यालोच्यताम्। 3+2+5

(d) अथर्ववेदस्य नामान्तरद्वितयं सकारणं समुल्लिख्यताम्। आथर्वणसंहितायाः मन्त्राणां विषयवैचित्र्यमालोच्य तेषां विभागीक्रियताम्। 4+6

**Unit - II**

2. अधोदत्तानां प्रश्नानां **पञ्च** अतिसंक्षेपेण सुरगिरा देवनागरीलिप्या च समाधेयाः। 2×5

(a) कौषितकि-ब्राह्मणं कस्मिन् वेदे आम्नायते? अस्य नामान्तरं किम्?

(b) ऋग्वेदस्य आरण्यकानि कति? एकस्य नाम उल्लिख्यताम्।

(c) का उपनिषद् मन्त्रोपनिषदिति नाम्ना अभिधीयते? कस्मात् हेतोः?

(d) वेदाङ्गानि कति? तत्र नक्षत्राणामवस्थानविषयं किं नाम वेदाङ्गमालोचयति?

(e) शिक्षावेदाङ्गस्य मुख्यविषयद्वयं किम्?

(f) सामवेदस्य मुख्योपनिषत्सु कस्यापि द्वयस्य नामोल्लेखं करोतु।

(g) कस्मिन् वेदे किमपि आरण्यकं नाम्नातम्? तस्य वेदस्य ब्राह्मणग्रन्थस्य नाम लेखनीयम्।

## Section - C

### Unit - I

3. अधोलिखितयोः प्रश्नयोः **एकतरस्य** उत्तरं प्रदेयम्। 10

(a) महाभारतस्य रचयिता कः? महाभारतस्य अपरं नामद्वयम् उल्लिख्यताम्। महाभारते यानि प्रासङ्गिकानि उपाख्यानानि लभ्यन्ते तेषु चतुष्टयस्य नामोल्लेखपूर्वकम् एकतमं सविशदं विव्रियताम्। 1+2+2+5

(b) महाभारते कति पर्वाणि दृश्यन्ते? तेषु प्रथमचतुष्टयस्य नामानि यथाक्रमम् उल्लिख्यन्ताम्। महाभारतस्य विरचनकालमधिकृत्य विबुधानां वक्तव्यमुपस्थातव्यम्। 1+4+5

### Unit - II

4. **एकः** प्रश्नः समाधेयः। 5×1

(a) महाभारताश्रिताः भासस्य नाट्यकृतयः।

(b) महाभारतस्य विषयमाहात्म्यम्।

## Section - E

### Unit - I & III

5. (a) अधःप्रदत्तेषु यथेच्छं कमपि विषयमवलम्ब्य **एका** टीका लेखनीया। 5

अष्टाध्यायी, पतञ्जलिः, सिद्धान्तकौमुदी।

(b) निम्नलिखितेषु यथामति विषय**मेक**माश्रित्य टिप्पणी कार्या। 5

आचार्यः वामनः, साहित्यदर्पणः, राजशेखरस्य काव्यमीमांसा।

### Unit - II

6. अतिसंक्षिप्ततया निम्नप्रदत्तेषु कस्यापि **पञ्चकस्य** उत्तरं प्रदातव्यम् (संस्कृतभाषया देवनागर्या लिप्या): 2×5

(a) नव्यन्यायप्रस्थानस्य जनकः कः? कस्तावत् तस्य ग्रन्थः?

(b) न्यायभाष्यकारस्य नाम किम्? तस्य कालः कः?

(c) वैशेषिकमते पदार्थाः कति? के च ते?

(d) बौद्धदर्शनमते भवचक्रं किम्? तस्य नामान्तरं दीयताम्।

(e) मीमांसासूत्रं केन प्रणीतम्? ग्रन्थस्य अस्य कस्यापि प्रसिद्ध-टीकाकारस्य नाम लेखनीयम्।

(f) आर्यसत्यानि कस्मिन् दर्शनप्रस्थाने स्वीक्रियन्ते? कानि च तानि?

(g) शारीरकभाष्यस्य प्रणेता कः? कस्मिन् दर्शनप्रस्थाने भाष्यमिदं समुपलभ्यते?

———————